# Kashisthitajnanavapirakshaka Dandapanitihasakathanam

# કાશીસ્થિતજ્ઞાનવાપીરક્ષક દણ્ડપાણીતિહાસકથનમ્

## Document Information

Text title : Kashisthitajnanavapirakshaka Dandapanitihasakathanam

File name : kAshIsthitajnAnavApIrakShakadaNDapANItihAsakathanam.itx

Category : shiva, raksha, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 8 | vAvRittashlokAH ||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશીસ્થિતજ્ઞાનવાપીરક્ષક દણ્ડપાણીતિહાસકથનમ્

- શિવપાર્વતીસંવાદે -
શ્રીપાર્વત્યુવાચ -
શિવાનન્દમયાનન્ત જ્ઞાનવાપીતટે શુભે ।
કેન પુણ્યપ્રભાવેણ દણ્ડપાણિઃ સ્થિરં સ્થિતઃ ॥ ૧॥

પુરાચીર્ણં કિમેતેન તપશ્ચર્યા કથં કૃતા ।
કુત્ર સ્થિતં પુરાઽનેન તત્સર્વં વદશઙ્કર ॥ ૨॥

શ્રીશિવ ઉવાચ -
હરિકેશવનં નામ કાશ્યામેકં વરાનને ।
શીઘ્રસિદ્ધિકરં રમ્યં વિલાસાશ્રયમસ્તિ મે ॥ ૩॥

બિલ્વમન્દારપુન્નાગ પૂગલોધ્રદ્રુમાવૃતમ્ ।
દ્રાક્ષારસાલરુદ્રાક્ષકોવિદાર વનાશ્રયમ્ ॥ ૪॥

ખર્જૂરનારિકેલામ્ર કરવીરૈર્વિરાજિતમ્ ।
જમ્બીરહેમકદલીતાલસાલસમાવૃતમ્ ॥ ૫॥

આમ્રાતકાર્જુનાશ્વત્થકેતકીતરુસંવૃતમ્ ।
નાનાવિધલતાકીર્ણં નાનાદ્રુમ વિરાજિતમ ॥ ૬॥

નાનાવિધલતાકુઞ્જમઞ્જુલં નયનપ્રિયમ ।
વસન્તપ્રમુખાનેકૈ ઋતુભિઃ સંશ્રિતં સદા ॥ ૭॥

નાનાવિધાનેકપુષ્પસઙ્કુલં સર્વદા શુભમ્ ।
નાનાવિધફલાકીર્ણં ધ્વનિ(ઘન)છાયમઘાપહમ્ ॥ ૮॥

એતાદૃશે વને રમ્યે હેમરાજીવિરાજિતમ્ ।
રત્નસોપાન સમ્બન્ધં સરઃ સમભવત્પ્રિયે ॥ ૯॥

ચલદ્વિમલ કલ્લોલકુલસઙ્કુલિતં સદા ।

પરાગપૂર્ણં પરિતઃ સરઃ સુરવરાર્ચિતમ્ ॥ ૧૦॥

તત્પ્રાન્તદેશેસરિતં (દેશં પરિતઃ) શૈવાઃ શિવપરાયણાઃ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગાસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ॥ ૧૧॥

રુદ્રાક્ષમાલાભરણાઃ શિવનામામૃતોત્સુકાઃ ।
શિવૈકદેવા વિમલાઃ શિવાચારરતાઃ સદા ॥ ૧૨॥

શિવૈકશરણાઃ શુદ્ધાશ્ચ પઞ્ચાક્ષરપરાયણાઃ ।
નિષ્કલ્મષા નિરાતઙ્કા નિવસન્તિ શિવાર્ચકાઃ ॥ ૧૩॥

શિવારાધનસંસક્તાઃ શૈવશાસ્ત્રવિશારદાઃ ।
પઞ્ચાગ્નિમધ્યે સતતં કાશીમરણકાઙ્ક્ષયા ॥ ૧૪॥

તપઃ કુર્વન્તિ સતતમનન્તા વિજિતેન્દ્રિયાઃ ।
જીર્ણપર્ણાશનાઃ કેચિત્કેચિદમ્બુકણાશનાઃ ॥ ૧૫॥

કેચિદ્ઘૃતાશનાઃ કેચિન્નિરાહારાઃ શિવપ્રિયાઃ ।
શુદ્ધાન્તઃ કરણાઃ શુદ્ધાઃ શિવતત્ત્વૈકચિન્તકાઃ ॥ ૧૬॥

તત્રૈવ વિમલે સ્થાને દણ્ડપાણિરયં શુભે ।
પઞ્ચવત્સરકો બાલસ્તપશ્ચક્રે દૃઢવ્રતઃ ॥ ૧૭॥

પુરા હિમાલયે રમ્યે નાનાધાતુવિરાજિતે ।
તપસ્તપ્તમનેનૈવ મહદ્ઘોરતરં મુદા ॥ ૧૮॥

સ કોટિયુગપર્યન્તં પઞ્ચાગ્ન્યન્તરગઃ સદા ।
રુદ્રાધ્યાયજપાસક્તઃ શિવલિઙ્ગૈકપૂજકઃ ॥ ૧૯॥

નિમીલિતાક્ષો નિયતો નિઃસઙ્ગઃ શિવચિન્તકઃ ।
એકેનૈવાઙ્ઘ્રિણા સ્થિત્વા ચક્રે ઘોરતરં તપઃ ॥ ૨૦॥

સર્વોત્તમં વેદવેદ્યં સર્વાધારં જગત્પ્રભુમ્ ।
ધ્યાયન્નેવ મહાદેવં ગૌરીરમણમવ્યયમ્ ॥ ૨૧॥

તદ્ઘોરતપસા ભાતા ભૂતાઃ સર્વે દિવાનિશમ્ ।
નત્વા કૃતાઞ્જલિપુટાસ્તિષ્ટન્તિનતકન્ધરાઃ ॥ ૨૨॥

લિઙ્ગપૂજારતં દૃષ્ટ્વા તરવઃ પુષ્પસઙ્કુલા ।
કમ્પિતાસ્તરવઃ સર્વે સ્વતએવ નમન્તિ તે ॥ ૨૩॥

પ્રજ્વલન્ત્યગ્નયો નિત્યં સ્વતઃ કમલલોચને ।
તપઃ પ્રભાવભીતાસ્તે જ્વલિતા ઇવ સર્વદા ॥ ૨૪॥

એવં બહુવિધં ઘોરં તપઃ કૃત્વા સ્થિતં મુદા ।
લિઙ્ગાર્ચન રતેનેત્થં બાલકેનૈવ તેન હિ ॥ ૨૫॥

તતઃ કદાચિન્નન્દીશમારુહ્ય વરવર્ણિનિ ।
મયા ગતં તતસ્તેન મહ્યં પૂજા કૃતા શુભા ॥ ૨૬॥

બહુધાચકૃતં સ્તોત્રં કૃતાચ નતયો મુદા ।
વરોઽપિ યાચિતસ્તેન શિવે ભક્તિર્દૃઢાસ્ત્વિતિ ॥ ૨૭॥

દત્તો વરો મયા તસ્મૈ સતતં સાદરં પુનઃ ।
તપશ્ચકાર વિમલો મૌનવ્રતપરાયણઃ ॥ ૨૮॥

બહુકાલં તપસ્તમં તપઃ પરમપિ પ્રિયે ।
તતઃ પુનર્મયા તત્ર ગતં તેનાર્ચિતં પ્રિયે ॥ ૨૯॥

તદા મયા સ પૃષ્ટોઽભૂત્તપસ્વી વિજિતેન્દ્રિયઃ ।
શિવૈકશરણઃ શુદ્ધઃ પઞ્ચાક્ષરપરાયણઃ ॥ ૩૦॥

તપો ઘોરતરં નિત્યં કિમર્થં ક્રિયતે ત્વયા ।
કિં તવાભીપ્સિતં તદ્ધિ દાસ્યે વૃણુ વરં પરમ્ ॥ ૩૧॥

ઇતિ પૃષ્ટસ્તતઃ સોઽપિ વવ્રે વરમનુત્તમમ્ ।
કાશીપ્રાપ્તિર્મમ શ્રીમન્નાસ્તીતિ પ્રીતમાનસઃ ॥ ૩૨॥

શ્રુત્વા તદુક્તં વચનં વિવિચ્ય ચ પુનઃ પુનઃ ।
વરો દત્તોમયા દેવિ તત્સન્તોષાર્થમુત્તમમ્ ॥ ૩૩॥

ઇતો જન્મ સહસ્રાન્તે કાશી સમ્પ્રાપ્યતે ત્વયા ।
એવમેવ મહદ્ઘોરં કરિષ્યતિ(સિ) તપો યદિ ॥ ૩૪॥

તતઃ કાશ્યાં સ્વધર્મેણ સ્થિત્વા નિયતમાનસઃ ।
તત્ર ઘોરતરં ભૂયઃ કરિષ્યતિ(સિ) તપોઽનઘ ॥ ૩૫॥

ઇતિ દત્તો વરસ્તસ્મૈ તદનુ પ્રતિજન્મનિ ।
જાતિસ્મરં(રઃ) તપો ઘોરં ભૂયો ભૂયશ્ચકાર સઃ ॥ ૩૬॥

તતઃ કાશીમાં પ્રાપ્ય તપશ્ચક્રે સ બાલકઃ ।
વિઘ્નૈઃ સંવિઘ્નિતોઽપ્યત્ર ભક્ત્યા ભૃશમનુત્તમમ્ ॥ ૩૭॥

તેનૈવ લજ્જિતાઃ સર્વે મુનયો બ્રહ્મવાદિનઃ ।
આશ્ચર્યં મુનયશ્ચક્રુર્દૃષ્ટ્વા બાલકમુત્તમમ્ ॥ ૩૮॥

દૃઢવ્રતં શિવરતં નિમીલિતવિલોચનમ્ ।
તં દૃષ્ટ્વા મુનયઃ સર્વે પ્રણમન્તિ પુનઃ પુનઃ ॥ ૩૯॥

અસ્થિમાત્રાવશિષ્ટાઙ્ગ લિઙ્ગાભ્યર્ચનતત્પરમ્ ।
દૃષ્ટ્વૈવ ભૂતાઃ સર્વેઽપિ નમન્ત્યનુદિનં મુહુઃ ॥ ૪૦॥

કૃતાઞ્જલિપુટા દેવા નિવસન્તિ પ્રણમ્યતમ્ ।
સિદ્ધગન્ધર્વ યક્ષાદ્યાઃ પૂજયન્તિ મુહુર્મુહુઃ ॥ ૪૧॥

વિઘ્નાનનેકાન્ સંહૃત્ય લિઙ્ગપૂજનતત્પરઃ ।
તપસ્તીવ્રતરં ચક્રે હરિકેશ વને શુભે ॥ ૪૨॥

એવં નિવસતસ્તસ્ય પુનઃ પ્રીત્યા ગતં મયા ।
તતઃ સમાગતં દૃષ્ટ્વા મામસ્તૌષી સ તુ બાલકઃ ॥ ૪૩॥

સ્તુત્વૈવં બહુધા બાલઃ પ્રણમ્ય ચ મુહુર્મુહુઃ ।
કૃતાઞ્જલિપુટો ભૂત્વા તસ્થૌ સન્તુષ્ટમાનસઃ ॥ ૭૪॥

તસ્યાસ્થિમાત્રાવશિષ્ટમઙ્ગં સ્પૃષ્ટં મયા તતઃ ।
ગાણાપત્યમપિ પ્રીત્યા દત્તં તસ્મૈ મનોરમે ॥ ૭૫॥

જ્ઞાનવાપીરક્ષણાર્થં તત્તટે સ્થાપિતો મયા ।
વરોઽન્યોઽપિ મયા દત્તઃ સન્તુષ્ટેન તતઃ પરમ્ ॥ ૭૬॥

ત્વત્કૃતં સ્તોત્રમમલં યઃ પઠેત્સતતં શુચિઃ ।
કાશીવાસોઽનિશં તસ્ય ભવતીતિ વરાનને ॥ ૭૭॥

તદાપ્રભૃતિ તત્તીરે દણ્ડં કાઞ્ચનમુદ્વહન્ ।
તિષ્ઠત્યત્યન્તન્સતુષ્ટઃ પૂર્ણભદ્રસુતઃ શિશુઃ ॥ ૭૮॥

તેનૈવ તાડ્યતે લોકઃ શિવદ્વેષકરઃ સદા ।
બ્રહ્માદયોઽપિ તં પૂર્વમર્ચયન્ત્યધુના શુભે ॥ ૭૯॥

કાશીવિયોગં તનુતે સ એવ કુપિતઃ સદા ।
મુનીનાં માનવાનાં ચ દેવાનામપિ શિક્ષકઃ ॥ ૮૦॥

દણ્ડપાણિકૃપા યસ્મિન્ ન ભવિષ્યતિ સર્વથા ।

સ વિહાય તદા કાશીં યાતિ દેશાન્તરં પ્રતિ ॥ ૮૧॥

પૂજનીયઃ પ્રયત્નેન દણ્ડપાણિર્મમ પ્રિયઃ ।
કાશીવાસરતૈર્નિત્યમપ્રમત્તૈર્યથોચિતમ્ ॥ ૮૨॥

દણ્ડપાણિપ્રસાદેન સ્નાનં ભવતિ ધીમતામ્ ।
જ્ઞાનવાપીજલે રમ્યે સર્વપાપાપનોદને ॥ ૮૩॥

શિવપ્રિયો દણ્ડપાણિઃ પૂર્ણભદ્રસુતોઽનઘઃ ।
યક્ષેશઃ કરુણાસિન્ધુર્ધૂતપાપો ગણેશ્વરઃ ॥ ૮૪॥

એતન્નામાષ્ટકેનૈવ પ્રત્યહં શિવતત્પરૈઃ ।
પૂજનીયઃ પ્રયત્નેન કાશીવાસિભિરાદરાત્ ॥ ૮૫॥

દણ્ડપાણિપ્રસાદાર્થં કાશીવાસરતૈર્નરૈઃ ।
ભોજનીયસ્ત્રયોદશ્યાં શૈવઃ ક્ષીરાદિસાધનૈઃ ॥ ૮૬॥

નમન્તિ મુનયસ્સર્વે પૂજયન્તિ ચ તં દ્વિજાઃ ।
તસ્યૈવાનુગ્રહાત્સર્વે કાશ્યાં તિષ્ઠન્ત્યનાકુલાઃ ॥ ૮૭॥

અયં યક્ષકુલોત્પન્નો બાલોઽપિ મદનુગ્રહાત્ ।
સામર્થ્યમીદૃશં પ્રાપ્ય તિષ્ઠત્યતિબલાન્વિતઃ ॥ ૮૮॥

પૂર્વપૂર્વભવેષ્વેવમનેનોગ્રં તપઃ કૃતમ્ ।
મામુદ્દિશ્યાનિશં સમ્યક્તત્ફલં જાતમીદૃશમ્ ॥ ૮૯॥

યઃ કશ્ચિદસ્તિ સુભગે મદ્ભક્તો મત્પરાયણઃ ।
સ સર્વવન્દ્યઃ શ્રેષ્ઠ ભવિષ્યતિ ન સંશયઃ ॥ ૯૦॥

ઇદં મત્વૈવં મુનયી દેવા યક્ષા નરોત્તમાઃ ।
લિઙ્ગરૂપિણમેકં મામર્ચયન્તિ દૃઢવ્રતાઃ ॥ ૯૧॥

ધૃતત્રિપુણ્ડ્રાજિતમાનસાર્થા મનુષ્યદેવર્ષિચરા નિરોહાઃ ।
મામેકમીશં શરણં પ્રપન્નાસ્તિષ્ઠન્તિ લિઙ્ગાર્ચન સક્તચિત્તાઃ ॥ ૯૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશીસ્થિતજ્ઞાનવાપીરક્ષકઃ દણ્ડપાણીતિહાસકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૮ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 8 . vAvRRittashlokAH ..

Notes:

Śiva શિવ narrates to Pārvatī પાર્વતી; about how the Yakṣa યક્ષ named Harikeṣa હરિકેશ, with intense devotion and penance appeased Him and was granted the boon to guard Jñānavāpī જ્ઞાનવાપી at Kāśī કાશી as Daṇḍapāṇi દણ્ડપાણિ.
Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

*Kashisthitajnanavapirakshaka Dandapanitihasakathanam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*